पथिमथोरिति· अंतोदात्तावेतौ· पूर्वग्रहणेनग्राह्यतइति· प्रत्ययेपितौस्येववक्ष्यं निर्दिष्टपरिभाषया चपूर्वस्यैवभविष्यतीतिभावः चेदं·
तस्येति प्रवर्त्तत इत्यनुषज्यते शसएवेति· बहुवचनांतरत्वेनाहल्लादिविभक्त्यसंभवात् तदाह षट्त्रीति· एकपदस्वरस्येति· प्रायकंप्रत्ययलक्ष
णेनेति वक्ष्यामित्यर्थः लाभायायीति प्रत्ययलक्षणमपेक्ष्यत इत्यनुषंजनीयं नस्यादिति एकपदस्वरत्वेन प्रत्ययलक्षणनिषेधादित्यर्थः
माङ्हिदात्तामिति गातिस्थेति सिचोलुक् आदिः सिचइतिस्वरवस्थितिसर्वं माहिपदेहि पदाभावे मापदास्वरत्वेननिघातापत्तिः मापदाभावेऽदु
दात्तत्वेनसति शिष्टत्वेनसिचस्वरनिवृत्यापत्तिः उभयाभावेऽदु स्वर एव स्यात् उभयोपादानेतु अडभावेहि चेत्यनुदात्तत्वनिषेधेसिच्
स्वरएवावतिष्ठते नतुनियमार्थमिति विध्यंतरेणप्राप्तेः स्थितमिति पक्षद्वयेपीतिशेषः संज्ञायामुपेति उपमानशब्दः संज्ञायामाद्युदात्त
इत्यर्थः चंचेवचंचा उपमानशब्दाएते उपमेयस्यसंज्ञाभवंति तत्रैवप्रतिकृतावितिकन् तस्यलुम्मनुष्य इतिलुप् सुपइतिषष्ठीपाठे
ति सर्वस्यसुपीतिसूत्रेसुपपदमावर्त्स्य आवर्त्तमाने सप्तमीमपनीय षष्ठीपाठेत्यर्थः आवर्त्तमानं च बहुव्रीहावेव पूर्वसूत्रारंभात् बहु
व्रीहेर्भाष्योदाहरणेच तत्रचसर्वस्येत्यनुवर्त्तते अतएवसुपीत्यस्य नवैयर्थ्यं तद्धिसर्वतरइत्यादावंतोदात्तश्रवणार्थं आचारक्विबं
तेतु सतिशिष्टत्वात्धातुस्वरेणैव भाव्यमितिवृत्तिः सुपइतिपाठेतु सुबंतात्तद्धितोत्पत्तेः सत्वेन प्रत्ययलक्षणेन सुबंतत्वादाद्युदात्तप्रवृत्तौ
तद्वैयर्थ्यं स्पष्टमेव अतएवसोयर्थः सप्तम्यइत्यस्यात्राप्रवृत्तिः नचैवंलाघवाभावः पथिमथोरितिवचनापेक्षयालाघवस्यस्फुटत्वात्

तदेवध्वनयन्नाह नयाचेति अतएवांगाधिकारप्रतिनिर्देशाभावपक्षेपि सर्वस्तोमङ्स्येतास्मि सूर्थ्यवचनकर्त्तव्यतावश्यकतोक्ता एतत्सूत्र
शेषभाष्यहाद्धिः उभयथेति स्वरमात्रविषयकत्वे सप्तमीनिर्दिष्टस्वरविषयकत्वेच वस्तुतोंगस्येति इदमत्र सिद्धांतानुक्तं पूर्वस्येतिवक्त
व्ये अंगस्य स्मृति सामर्थ्याच्चत्रांगसंज्ञकस्य कार्यं विधिष्यते तच्च कार्यमांगमनांगं वा तेन पंचेत्यादौ पदत्वस्य लघ्वांगोद्देश्यकत्वाभावात्स
दत्वसिद्धिः भसंज्ञायास्तु प्रत्यये परतो विधानात्तत्र वृत्तिकाले गत्वसत्वानिषेधप्रवृत्तस्य राजपुरुषइत्यादौ नभत्वं अंगसंज्ञातु प्रत्ययो
त्पत्तिसंभावनाकाल एव प्रवर्त्तते यदवधित्वेन प्रत्ययविधिसंभावनात स्य बुद्धिस्थप्रत्ययपरत्वमादायैवांगसंज्ञायाः प्रवृत्तिः इदमेव तु
केरनाकौ लत्यत्सूत्रयोः स्पष्टीकृतं भाष्यकृता नवापरंनिमित्तमाश्रीयते अंगसंज्ञाच भवति प्रत्ययलक्षणेनेति अन्यथा प्रत्ययपर
तोंगसंज्ञाविधानादंगसंज्ञायां प्रत्ययलक्षणनिषेधाप्राप्त्या शुद्धिः स्यस्यैवप्रत्ययलक्षणेनेत्यस्य प्रत्ययज्ञानेनेत्यर्थः ध्वनितं चेदं प्र
त्यक्षसंज्ञाप्रकरणे यथोद्देशपक्षोपपादनावसरे कैयटेन भविष्यति किंचित्कार्यमिति संज्ञापरिभाषं प्रलीयते इति प्रयोजनविशेषान
देशेन सामान्यप्रयोजनोद्देशेन संज्ञाप्रवृत्तिरित्यर्थः नवापरमित्यपि भाष्यं यथोद्देशपक्षस्यपास्येव उद्देश्यकोटिनिविष्टभिन्नकार्यस्येवन
लुप्तमते निषेधइत्यर्थे भाष्यस्य अनित्यत्वात्संज्ञायां ननिषेध इति विवरणकाराः यद्गीत्वान्तु कृष्यत्वे विषयापहार एवेति तत्रानुस्म
तैरेवान्वाख्यानं तद्गीत्वापदत्वादेरेवंरीत्यैवोपपादान्न स्यावश्यकत्वात् निरधिष्ठानारोपासंभवेनारोप्यस्य काल्पनिकमपि न सुप्तादिसं

भाष्यमिति प्राहुः नास्ति फलभेद इति शास्त्रप्रवृत्तिफलं स्वरस्तदाश्रयः स्थानीतद्भेद इत्यर्थः फलशब्दोऽ४र्थ आयजंतः केचित्तु यद्यपि लु
प्तप्रत्ययलक्षणप्रवृत्तस्य प्रवृत्तिभ्यां फलभेदोऽस्ति तथापि फलभेद इत्यस्य विधेयस्वराश्रयभेद इत्यर्थो न दोषः इत्याहुः यदन्तस्येति यद्य
पि अत्र यदित्यत्र लुप्तः प्रत्ययः अपि शब्दस्य स्वरप्रवृत्तौ निमित्तमेव तथापि किं तदिति षष्ठीनिर्देशात् स्थानित्वेनैव निमित्तत्वं स्थानित्वं च
लुप्तस्यासंभवीति न सः निमित्तं पदसंज्ञायां तु स्वादिष्विति सूत्रे निमित्तत्वेन सुपः क्लृप्तत्वात्प्रत्ययनिमित्तत्वमिति भावः नच प्रत्ययेति कि
मुक्तं हितस्तदंतस्येत्यर्थः स्वादिस्त्यर्थः वक्ष्यमाणत्वादिदिति अयंभावः प्रत्ययग्रहणे तदंतग्रहणमिति नापूर्वं किंतु शब्दरूपं विशेष्यमादा
ययेन विधिरितदंतग्रहणमित्येतदर्थसिद्धमेव तत्र विशेष्यस्य च शब्दानुशासनप्रस्तावात्सर्वत्र सत्वेपि सत्येवगमके तत्सदाद्यतदंतग्र
हणं तस्य विशेष्यत्वात् असति तु गमके तस्य विशेषणत्वमेवेति तत्सूचयन्नाह विशेषणेति स्यादेवोदाहृतेति स्थानिनि सति न्यायमा
नकार्यस्य स्थानिभिन्नरूपे आदेशे अतिदेशादित्यर्थः अभावरूपत्वेति अयंभावः स्थानिधर्मारोपेणादेशे कार्यप्रवर्तकत्वमतिदेश
स्य स्वभावो न तु स्वरूपग्राहकत्वं आदेशविधिवैयर्थ्यादित्यादि स्थानिवत्सूत्रे स्पष्टं अत एव रूपातिदेशः न ग्रहणं ज्ञापमुक्तं भाष्यकृता
एवं चातिदिष्टप्रत्ययत्वादिमत्सभावेन तद्धितत्वेपि निरवयवत्वादभावस्य तद्धितचरमावयवत्वाभावादुद्देश्यत्वस्य बाधात् न च चरमा
वयवत्वमतिदेशलभ्यमिति वाच्यं वर्णधर्मान्तत्वस्याभावे वचनशतेनापि विधातुमशक्यत्वात् भाष्यमत इति वार्तिकमते तु प्रत्ययनि

मित्तकमन्यस्य कार्यं प्राप्यते न तु तस्यैव लक्षणपदेन स्थानिभिन्नस्य निमित्तस्य ग्रहणात् स्थानित्वेनापि निमित्तत्वग्रहणे तु प्रत्ययस्येति संबं
धसामान्यषष्ठ्या प्रत्ययलोपे प्रत्ययसंबंधि स्थानिवदित्यर्थेन प्रत्ययस्थानिकस्य प्रत्ययनिमित्तकस्य च सिद्धौ लक्षणपदवैयर्थ्यापत्तिरिति बोध्यं
केचित्तु प्रत्ययजमिति सिद्धे लक्षणग्रहणं निमित्तत्वलाभार्थमित्याहुः लुकापहारादिति अयं भावः नीरूपस्याभावस्य स्थानित्वायोगात् आदे
शविधौ हि स्थानषष्ठी स्थाने च प्रसंगः शास्त्राणां प्रसंगश्चोच्चारणकृत एव न हि लुप्ते स्थानिकल्पनावसहस्रेणापि उच्चारणप्रसंगस्यापादनं शक्यं
कर्तुं एतेन बुद्धिकृतपौर्वापर्यस्य बुद्धिकृतस्थान्यादेशभावइतिनिरस्तमिति निर्बाधमिति वास्तविकपूर्वस्य पदत्वेपि पूर्वोद्देश्यकत्वाभा
वादिति भावः रोरेवेति उत्वयत्वादेर्हलः परत्वेनाप्राप्तेरित्यर्थः रुत्वस्येति रेफेण च सिद्धेरित्यर्थः दिगिति दिगर्थस्तु सर्वस्तोमे सर्वस्य सुपीति
आद्युदात्तत्वसिद्धये सर्वस्वरे कर्त्तव्ये प्रत्ययलक्षणं भवतीति वचनमेव वस्तुतो गस्येति पक्षे कर्त्तव्यमिति भाष्येण च स्पष्टं नन्वेवं लुप्तप्रत्यय
निमित्तकं लुप्तप्रत्ययावधिकपूर्वस्यागमनांगं वा कार्यं नेत्यर्थे मध्यवर्त्तिनः सुबंतमिति पदसंज्ञायाः न लुमतेति निषेधाभावेन पदत्वप्रयु
क्तकार्यापत्तिरित्याशये पूर्वपक्षयति स्यादेतदिति तदवयवभूतं विधानावधिसमुदायावयवभूतं अंतरेण इति नेन राजपुरुषेण सत्र पूर्व
पदस्य न भत्वमिति नलोपसिद्धिः उभयोरपीति भसंज्ञेत्यनुषंजनीयं भत्वाविषये शंकते नन्वेवमपीति भत्वविषये परिहारेपि । निषेधादि
ति अयमर्थः स्वादिष्विति योगो विभज्यते स्वादिपूर्वं पदं स्यादित्यर्थः ततः असर्वनामस्थाने सुबंतमित्यनुवर्त्तते पचीत्य प्रकृष्यते असमर्थ

समासश्चायं यजि सर्वनामस्थाने परतस्तद्विधानाबाधिभूतं पूर्वपदं न विधानाबाध्यवयवभूतसुबंतमपि पदं नेत्यर्थः विधानाबाध्यव
यवसुबंतं च यजादिसर्वनामस्थानाव्यवहितमेव ग्राह्यं तेन राजपुरुषावित्यादौ पूर्वपदेन नलोपसिद्धिः नाश्रीयत इति तेनोभयविध
पदत्वनिषेधसिद्धिः पचीस्यपकर्षप्रयोजनं शंकासमाधानाभ्यामाह नन्वेवमित्यादि सुवागिति चैत्रो विशेष्योनतु कुलं तत्र सुवः सत्वेन
पदत्वाप्राप्तेः समुदायस्य सुबंतमिति पदसंज्ञापि लुप्तसो चकारांतएवेति सापि निषिध्यते इत्यर्थः दृष्टापत्तेरिति वस्तुतस्तु पचीस्यपकर्षो
ऽयमर्थः सोपरत उभयविधपदत्वस्थानेन निषेधेपि स्वंतस्य सुबंतमिति प्राप्तपदत्वस्य कथमनेन निषेध इति चिंत्यं संबंधांतस्येति भाष्येप
दृग्ग्रहणं तु चिंत्यप्रयोजनं सात्प्रतिषेधेनेति ननु ज्ञापितेपि न चारितार्थ्यं सुप्तिङ् तमित्यंत वर्णि विभक्त्यापदत्वमादाय पदादि वा त्रि
सादित्वस्यासिद्धिरिति चेन्न स्वादिष्विति पदसंज्ञया सुप्तिङ् तमित्यस्याः बाधात् किं च स्वादिष्विति यस्य पदसंज्ञा तदंतं यत्तेन चि सरत्व
मादाय निषेधाप्रवृत्तिरित्यस्यैव ज्ञापनात् उक्तार्थे तु स्वकृतहेतुत्वमित्यभिप्रायक इत्याहुः केचित्तु विरोधाभावाद्बाधकत्वाभावात्समु
दाय एवेति यथाश्रुतं साध्वेवेति प्राहुः सुगंवेति लाघवादितिभावः तथाहि अंबां वेति सूत्रे स्य इति सुपि स्य इति विहितकप्रत्ययांत
स्यानुकरणं प्रतिपदोक्तत्वात् गोष्ठ इत्यादौ सुपि स्य इति कगति कारकेति सुबुत्पत्तेः पूर्वं समासे पदस्यादेरित्यस्य षत्वनिषेधाप्राप्त्या
वादेशप्रत्यययोरिति षत्वेन गोष्ठ इत्यादिसिद्ध्यागवादिग्रहणं न कर्तव्यमिति प्राहुः वाम्नेकेत्विति पर्युदासासदंतविधावेवायं निषेधः

तेन सुगस्यां शाविस्यादौ समासे ईश शब्दस्य पदत्वात् रुजादेः पदस्य विधीयमानो रु-मुट् सिध्यति अन्यथा रु-मुटः पदादिविधित्वाभावा
3 त्प्रतिषेधापत्तौ रु-मुट् न स्यादिति बोध्यम् अनित्यतायामिति केचित्तु षत्वविधौ गतिकारकोपपदानामिति परिभाषा नाश्रीयते अंवां
वेति सूत्रेण वादिग्रहणात् ज्ञापकात् अन्यथा गोष्टुस्यादौ सात्पदाद्योरिति निषेधाभावे आदेशप्रत्यययोरित्यनेनैव टुषु सिद्धे तद्ग्र
हणं वैयर्थ्यापत्तिरित्याहुः कर्तव्यमेवेति अत्रापि अपदादिविधाविति संबंधात्पदांतविधावेव निषेधः षत्वे तु पदत्वं भवत्येवेति षत्वनि
षेधः सिध्यतीति बोध्यं नियमार्थं चेदमिति पदांतसंबंधिविधावित्यर्थः अतएव परमवुधाविस्यादौ भवभावो न अस्ति च निमित्तको
टे पदबोत्तत्व प्रतिषेधः यथोक्तवार्त्तिकोप्यपदादीति पर्युदासो बोध्यः प्रसज्यप्रतिषेधेपि प्रतिपदोक्तत्वात्सात्पदाद्योरित्येव गृह्यत इति
व्याख्येयं कुत्स्थेः योगविभागादिः पक्षद्वयं उत्तरपदत्वे चेति वचनतत्प्रत्याख्यानरूपं सावपीति स्वादिष्विति योगविभागेन सावपि पद
त्वप्राप्तेः पक्षे चेति अंगाधिकारस्थत्वाभावात्पूर्वकार्यत्वाभावाच्च नुसो न लुमतेत्यस्याप्राप्तेरित्यर्थः प्राप्नुवंतीति विशिष्टकार्यत्वात्
माभूदिति आदेश इति शेषः सर्वस्य पदस्येत्यनुवर्तते श्चेति सर्वस्य द्वे इत्यतः अनुदात्तं सर्वमपादादौ । विमत इति केपरोक्ति श्विंस्यापष्ठ्यं
तस्यानुवृत्तिसंभवे विपरिणामायोगात् सिद्धांतेडिति वार्त्तिकमते त्वांगत्वाभावान्न लुमतेत्यस्याप्राप्तिः लुङि परत इति लुकाल्लुङ्
विषयत्वापहारशङ्किषयसप्तम्याश्रयत्वेप्यसिद्धेरिति भावः इति चेदिति केचित्तु न लुङ्लुङीति विषयसप्तम्याभविष्यत्स्यादेशाभविष्यं

तीति चेत् न लुकालुक्येविषयत्वाद्व्यवहारेण विषयत्वज्ञानार्थं प्रत्ययलक्षणमाश्रयणीयमेव तच्च न लुमतात स्मिन्नित्यर्थे न प्राप्नोतीति प्राहुः
विधानादिति लुकि विवक्षिते यदार्धधातुकं तस्मिन्नविवक्षिते वधाद्यादेशात्प्रसर्थः लुमप्रत्ययनिमित्तं पूर्वं वस्याङ्गसंज्ञाविशिष्टस्यय
कार्यं तत्र निषेध इत्यर्थान्तरे दोष इति भावः ननु लुगादिविषये शब्दानित्यत्वापत्ता अनुसन्धिरेवेति कथं लुङ्·विषयार्धधातुक
संभवः कथं वा उद्दयः इति चेत् न प्रत्ययमात्रवृत्तिधर्मो यत्र निमित्ततावच्छेदकस्तत्कार्यनिमित्तत्वमभावे वोध्यते प्रत्ययलक्षणेन अ
भावे च योर्वापर्यादेर्बुद्धिकृतस्यैव सत्त्वात् हार्यारोपेणैव शास्त्रप्रवृत्त्यादि एवं च लुकाविषयत्वापहारेऽपि आरोपितं बुद्धिविषयत्व
मादाय कार्यप्रवृत्तिः प्रत्ययलक्षणे न पर्यवसन्ना अवश्यं चैवं विज्ञेयं अन्यथा पदत्वादि लुकि सति न स्यात् कार्यविपरिणाममात्रसिद्ध
मिति भाष्येण चैतद्बोधितं एवं च विषयसप्तमीत्वेऽप्यवधीत्वादोन दोष इति प्राहुः निर्दोष इति सर्वलोपे स्वरसिद्ध्यर्थं तु सर्वस्य सुप इति पा
ठमिति कृतं यो ऽत्र यत्नः इत्यत्र तस्य भाष्यस्वरसः ननु मतांगस्य अचां स्यादिति अचोऽस्या· तस्मिन्नि· तस्मादि· स्वं रूपं· अणुदित्स· तपर
स्तत्कालस्य

क्षेरवरदोका १.४

4



४८६